विषय-सूची

गुरुकुल-पत्रिका का वार्षिक मूल्य—

देश में - ४ रुपये, विदेश में - ७ रुपये, एक प्रति - ४० पैसे

सूचना

—✡—

* सर्वपाठकों को सूचित किया जाता है। कि उत्तर प्रदेश में **बिजली कर्मचारियों की हड़ताल तथा तत्सम्बन्धी अन्य अव्यवस्था के कारण पत्रिका समय पर प्रकाशित नहीं हो रही है।** अतः पत्रिका विलम्ब से प्राप्त होने के कष्ट के लिये पत्रिका कार्यालय को बड़ा खेद है।

* यह बड़ा हर्ष का विषय है कि **गुरुकुलोत्सव पर** गुरुकुल-पत्रिका का लगभग १५० पृष्ठों का **वेद-योगाङ्कः** (वेद में योग) नाम से एक विशेषाङ्क प्रकाशित हो रहा है। जिसमें वेद के लब्ध प्रतिष्ठ विद्वानों के गवेषणात्मक लेख होंगे। **यह अङ्क मार्च-अप्रैल** (सन् १९७३) तदनुसार **चैत्र बैशाख** २०-३० **इन दो** मासों का सम्मिलित अङ्क होगा । **इसका मूल्य १) रुपया होगा**, ग्राहकों को उसी मूल्य पर दिया जायेगा। **अन्य व्यक्ति** डाक व्यय **सहित १.७५ पैसे** भेज कर मंगा सकतें हैं।

—सम्पादक

ओ३म्

गुरुकुल-पत्रिका

[गुरुकुलकांगड़ीविश्वविद्यालयस्य मासिक पत्रिका]

माघ २०२६, फरवरी १९७३, वर्षम्-२५, अङ्कः ६ पूर्णाङ्कः २६०

श्रुति सुधा

ऋषिः—अयास्यआङ्गिरसः । देवता—बृहस्पतिः । छन्दः—त्रिष्टुप्—

इमां धियं सप्तशीर्ष्णीं पिता न ऋतप्रजातां बृहतीमविन्दत् ।
तुरीयं स्विज्जनयद् विश्वजन्योऽयास्य उक्थमिन्द्रायशंसन् ।।

ऋ. १०।६७।१

बृहस्पति कहता है कि (नः पिता) हमारे पिता अंगिरा न (इमां सप्तशीर्ष्णीं) इस सात सिरोंवाली (ऋतप्रजातां) ऋत से उत्पन्न (बृहतींधियं) महान् दिव्य बुद्धि अर्थात् ऋतम्भरा प्रज्ञाको (अविन्दत्) प्राप्त किया । और (विश्वजन्यः) विश्व के उत्पादक (अयास्यः) मुख्य प्राण ने (इन्द्राय उक्थं शंसन्) इन्द्र की स्तुति करते हुए अथवा इन्द्र (दिव्यमन) के उत्थान के लिये स्तुति करते हुए (तुरीयंस्वित्) चतुर्थ धाम को भी (जनयत्) पैदा किया ।

ऋतं शसन्त ऋजु दीध्याना दिवस्पुत्रासो असुरस्य वीराः
विप्रं पदमङ्गिरसो दधाना यज्ञस्य धाम प्रथमं मनन्त ।।

ऋ १०।६७।२

(ऋतंशंसन्तः) ऋत की प्रशंसा करने वाले (ऋजु दीध्यानाः) सरल बनकर ध्यान करने वाले (दिवस्पुत्रासः) द्युलोक व मस्तिष्क के पुत्र । (असुरस्यवीराः) प्राण शक्ति के वीर पुरुष ये आंगिरस (विप्रं पदं दधानाः) विप्र के पद को धारण करते हुए (यज्ञस्य प्रथमं धाम मनन्त) यज्ञ के प्रथम व प्रमुख धाम को जानते हैं ।

पूर्वतोऽनुवृत्ता--

वैदिकसाहित्यसौदामिनी

श्री वागीश्वरो विद्यालंकारः साहित्याचार्यः

व्यवहारोपयोगित्वाद् व्यक्तिरेव तु गृह्यते ।
न जलाहरणाद्यर्थे घटत्वं घटते क्वचित् ।।५६।।
संकेतस्य ग्रहः किन्तु व्यक्तौ सर्वत्र नोचितः ।
अनन्तत्वाद् व्यभीचारादभिन्नार्थतया तथा ।।५७।।

अभिन्नार्थतया=चैत्रो गौरः पुमान् यातीत्यत्र घटकलशवत् सर्वेषां पर्यायवाचकत्वप्रसङ्गादित्युक्तं प्राक् ।

अनन्तानां कथं तासां व्यक्तीनां सह संस्थितिः ।
तदभावे कथं तासु संकेतग्रहसंभवः ।।५८।।
एकस्यां गवि संकेतो गोपदस्य भवेद् यदि ।
तेनैवान्यगवां बोधे व्यभिचारो न वार्यते ।।५९।।
अयं चैत्रः पुमान् गौरो यातीत्यादि पदानि चेत् ।
व्यक्तौ संकेतितानि स्युः सर्वेषां चैत्रवाचिता ।।६०।।
एकार्थवाचिनां तेषां पौनरुक्त्यमपार्थकम् ।
विषयस्याविभागश्चाभिन्नार्थेष्वखिलेष्वपि ।।६१।।
व्यवस्था न भवेदेवं विशेषणविशेष्ययोः ।
कर्तृकर्मक्रियादीनां तथोद्देश्यविधेययोः ।।६२।।
पर्यायवाचकत्वे च रक्तपुष्पादिशब्दयोः ।
विशेषणविशेष्यत्वं न भवेद् घटकुम्भवत् ।।६३।।

तस्मादुपाधिभेदेन पदानां चतुर्विधत्वं तदनुरूप एव च संकेतग्रहः स्वीकार्यः--

जातौ गवादिशब्दानां शुक्लादीनां तथा गुणे ।
गच्छतिप्रभृतीनां च क्रियासु गमनादिषु ।।६४।।
चैत्रडित्थादि शब्दानां व्यक्तौ च व्यक्तिवाचिनाम् ।
उपाधिष्वेव संकेतो जायतेऽसौ चतुर्विधः ।।६५।।

उपाधिस्वरूपविवेचनम्--

उपाधि र्द्विविधो वस्तुधर्मो यादृच्छिकस्तथा ।
सिद्धसाध्यत्वभेदेन प्रथमोऽपि पुनर्द्विधा ।।६६।।
सिद्धस्य, वस्तुधर्मस्य भेदद्वयमुदीर्यते ।
प्राणप्रदः पदार्थस्य जात्याख्य प्रथमस्तयोः ।।६७।।
व्यक्तिभेदेन भिन्नेषु बहुष्वप्येकजातिषु ।
समानाकृतिनिर्ग्राह्या जातिरेकैव तिष्ठति ।।६८।।
स्वात्मानं लभते व्यक्ति र्नहि जातिं विना क्वचित् ।
जात्या कृतात्मलाभा तु गुणैः सैव विशेष्यते ।।६९।।
न हि व्यक्तिः स्वरूपेण कापि गौरथवाप्यगौः ।
किन्तु गोत्वाभिसम्बन्धादेव गौरभिधीयते ।।७०।।

तदुक्तम्---

'न हि गौः स्वरूपेण गौ र्नाप्यगौः, गोत्वसम्बन्धात्तुगौः ।' इति वाक्यं व्याचक्षाणेन श्री पण्डितराजेन रसगङ्गाधरे- गौः सास्नादिमान् धर्मी स्वरूपेण अज्ञातगोत्वकेन धर्मिस्वरूपमात्रेण न गौः=न गोव्यवहारनिर्वाहकः, नाप्यगौः=नापि गोभिन्न इति व्यवहारस्य निर्वाहकः । तथा सति दूरादनभिव्यक्तसंस्थानतया गोत्वाऽग्रहदशायां गवि गौरिति गोभिन्न इति वा व्यवहारः स्यात् स्वरूपस्याविशेषात् । घटे गौरिति गवि चागौरिति वा व्यवहारो भवेदिति भावः । गोत्वाभिसम्बन्धाद्=गोत्ववत्तया ज्ञानादेव गौ र्गोशब्दव्यवहार्य इति । तदुच्यते-

अज्ञायमानगोत्वायां दूरस्थायां गवि क्वचित् ।
किञ्चिदित्यात्मकं ज्ञानं जायते निर्विकल्पकम् ।।७१
गोत्वादिमति संजाते ज्ञाने तु सविकल्पके ।
गोहयाद्यात्मको बोधो जायते गोहयादिषु ।।७२
कश्चित् स्वरूपमात्रेण स्याच्चेद् गौरथवाप्यगौः ।
हयादेरपि गोत्वं स्यात् तत्र स्वरूपसत्तया ।।७३

गोहयहस्त्यादिष्वपि सर्वेषु पदार्थेषु स्वं स्वं रूपं भवति, गोत्वहयत्वादिजात्यात्मकज्ञानशून्यं तु

तत्र परस्परपरिच्छेदकारकम् । अथ पदार्थस्य सिद्धो द्वितीयो वस्तुधर्मो गुणाख्यः--

अपेक्ष्य जातिं गौणत्वाद् गुणनाम्ना प्रकीर्तितः ।
द्वितीयो वस्तुधर्मस्तु सिद्धो वैशिष्ट्यमात्रकृत् ।।७४
एकेन गोत्वधर्मेण सजातीयाः परस्परम् ।
शुक्ला गा अन्यवर्णाभ्यो विशेषयति शुक्लता ।।७५

तत्र जातिर्नित्या, गुणास्त्वनित्याः । गौस्तावद् गौर्यावत् तत्र गोत्वम् । घटादेः श्यामतादयो गुणाः पाकादिना निवर्तन्ते । किञ्च प्रथमक्षणे घटो निर्गुण एवोत्पद्यते-इति वैशेषिकमतम् ।

अथपदार्थानां तृतीयो धर्मः साध्य क्रियाभिधः ।

वृश्चत्यादिभिराख्यातैः पदैर्या त्वभिधीयते ।
तत्र पूर्वापरीभूतावयवत्वविवक्षया ।।७६।।
परशूत्क्षेप –निक्षेपाभीक्ष्णतादि – निरूपिता ।
काष्ठनिष्ठद्विधाभावादिफला कारकाश्रया ।।७७।।
क्रियेत्याख्यायते साध्या सा व्यापार१ परम्परा ।
साध्यताफलनिष्पत्तेः क्रमेण जायमानता ।।७८।।

उपपन्ना ननु वृश्चतिपचतिगच्छतिप्रभृतिषु क्रियासु संयोगविभागसंततिरवान्तरव्यापारपरम्परा च, न तु सा जीवति तिष्ठति स्मरतीत्यादिष्विति चेत्—

श्वासोच्छ्वासैः सततहृदयस्पन्दनै रक्तगत्या,
कोशानां च त्रुटनघटनैः प्राक्तनानां नवानाम् ।
अन्तर्ग्रन्थिस्रवणपचनप्रक्रियाचेतनाभि,
र्निश्चेष्टः सन् बहिरिह पुमानुच्यते जीवतीति ।।१।।
अनिवार्याः क्रियाः सर्वा जीवितुं श्वसनादिकाः ।
प्रवर्तन्ते स्वभावेनाऽज्ञायमाना अपि स्वयम् ।।२।।
तिष्ठतां स्वपतां वापि पठतां ध्यायतां तथा ।
कायिक्यो मानसिक्यो वा विरमन्ति न ताः क्षणम् ।३
सम्यग् विविच्यमाना तु न सास्ति जगति क्रिया ।
व्याप्नोति संततिर्नैव यां संयोगविभागयोः ।।४।।

नन्वेवं संयोगविभागसंततिव्यतिरिक्तायाः क्रियायाः कर्मेतराभिधानायाः पदार्थान्तरत्वं प्रत्याख्यातं भवति, यतः--

उत्क्षेपणं ततोऽपक्षेपणमाकुञ्चनं तथा ।
प्रसारणं च गमनं कर्माण्येतानि पञ्च च ।।

(मुक्तावल्याः प्रत्यक्षखण्डे ६ष्ठ कारिका)

इह कर्मत्वेनाभिमतेषु व्यापारेषु=उत्क्षेपणादिषु संयोगविभागाभ्यामन्यत् किं यत् क्रियानाम्नाभिधीयेत इति चेत्-सत्यमुक्तं भवता । वस्तुतः कारकाणां भेद एव संयोगविभागसंततौ तान् विवर्तान् दर्शयति यैः सा भवति-एधते-चलति-धावति-सर्पति वहति-जानाति-ध्यायति-हरतीच्छतीत्यादिभिर्विभिन्नाख्यातनामभिर्व्यवह्रियते । अतः—

अनेकसंयोगविभागरूपा
पूर्वापरीभूतविभिन्नभागा ।
एकाऽपि सा कारकभेदभिन्ना
क्रियोच्यते तैर्विविधाभिधानैः ।।५।।
किन्त्वस्ति गूढो विषयोऽयमत्र
बुधा हि याथार्थ्यविदः प्रमाणम् ।
व्यधायि चर्चेयमिह प्रसङ्गाद्
मया तु विद्यार्थिकुतूहलाय ।।६।।

---

१ एवमावश्यकभोज्योपादानपूर्वको ज्वलनपचनभाजनाधिश्रयणाद्यवश्रयणान्तो जलानलकरणकतण्डुलादिविक्लेदफलकः सकल व्यापारकलापः पचतिपदेनोच्यते । अत्रापि तण्डुलदाल्यादीनां प्रथमपात्राद् विभागः पिठरादिना संयोगः पिठरादेर्भूतलाद् विभागश्च्युल्या संयोगः, लवणहरिद्राचूर्णादेः स्वपात्राद् विभागो दाल्यादिना संयोगः, दर्वीघट्टनेन पिठरस्य विभिन्नप्रदेशैः संयोगो विभागश्च, जलाग्नि संयोगेन तण्डुलादिकणावयवानां विभागः इतीदृशाः विविधव्यापाराः सर्वास्वपि क्रियासु स्वयमूह्याः । इत्थमनेकसंयोगविभागैरेकोऽवान्तरव्यापारस्तथाविधैरनेकैस्तैश्चैका क्रिया निर्वर्त्यते ।

यत्कृते सकलारम्भो यस्मिन् स पर्यवस्यति ।
स एव भावनाद् भावस्तस्य चात्र प्रधानता ॥७९॥

इह छेत्तव्यकाष्ठैकभागस्यापरकाष्ठोपरिस्थापनम्, तदुपरि पौनःपुन्येन परशूत्क्षेपनिक्षेपसंततिः, अन्तराऽन्तरा क्वचिद् घर्षणेन परशुधारातीक्ष्णीकरणम्, मध्ये विरम्य विरम्य धूमवर्तिपानं चेत्यादयोऽवान्तरव्यापाराश्छिदिक्रियाया घटकत्वेन परिगणयितुं शक्यन्ते । विस्तरभिया विषयोऽयं नेह प्रतन्यते ।

अथ वक्तृभिर्वस्तुनि व्यक्तौ वा स्वेच्छयाऽऽरोपितो न तु यथार्थो धर्मश्चतुर्थ उपाधिर्यथा देवदत्त इत्यादिसंज्ञा ।

यादृच्छिक उपाधिस्तु तुरीयो यो ह्यसन्नपि ।
स्वेच्छयाऽऽरोप्यते व्यक्तावेकस्यामेव केवलम् ॥८०
नापेक्षा तत्र जात्यादेः प्रकृतिप्रत्ययार्थयोः ।
पूर्णं तदंशमात्रं वा नाम पूर्णार्थवाचकम् ॥८१॥

पुत्रादितत्तत्पदार्थादीनां वा नामकरणे व्यवहारोपयोगित्वात् संकेतस्यैव प्राधान्यम् । पुत्रादिविषये शुभाशंसादिकं तु तत्र गौणम् । यथा—

श्रुतस्य यायादयमन्तमर्भक-
स्तथापरेषां युधि चेति पार्थिवः ।
अवेक्ष्य धातोर्गमनार्थमर्थवि-
च्चकार नाम्ना रघुमात्मसंभवम् ॥ रघु.

तेन कश्चिदन्धोऽपि कमलनयनो, दरिद्रोऽपि वा लक्ष्मीपतिरभिधीयते। नाम्न एकदेशस्तदंशयोः प्रथमाक्षराणि केचनान्येऽपि प्रकारा वा पूर्णनामार्थबोधकाः । यथा भीमसेनो भीमः । रामचन्द्रो रामः । सत्यभामा सत्या । शुक्लदिवसः शु.दि. । बहुलदिवसः ब.दि. । रामलालो रा.ला. । लाइट ऐम्प्लिफिकेशन स्टिम्युलेटड एमिशन ओफ रेडियेशन =लेसर (Lacer) एवं यू.के, यू.ऐस.ए., यू.एन.ओ इत्यादीनि नामानि ।

एवं जातिगुणाद्युपाधिसम्बन्धेन पदानां चतुर्विधत्वं प्रतिपाद्य तेषां यौगिकादयो भेदा अर्थज्ञाने विशेषोपयोगित्वात् प्रदर्श्यन्ते । यौगिकादिभेदेन पदानामर्था अपि चतुर्विधा इत्युच्यते——

यौगिकं च तथा रूढं योगरूढं तथैव च ।
तुर्यं यौगिकरूढं च पदमित्थं चतुर्विधम् ॥८२॥
केवलावयवानां हि प्रकृतिप्रत्ययात्मनाम् ।
शक्त्यार्थबोधकं यत्तु पदं तद् यौगिकं मतम् ॥८३
पाकार्थकात्पचेर्धातोः कर्तरि प्रत्यये ण्वुलि ।
निष्पन्नात्पाचकाच्छब्दात् पाककर्ता प्रतीयते ॥८४

इह हि प्रकृतिप्रत्ययात्मनाम् इति कथनेन यथावसरम् उपसर्गादेरपि ग्रहणम् । यथा—

इन्द्रो यातूनामभवत्पराशरो
हविर्मथीनामभ्याविवासताम् ।
अभीदु शक्रः परशुर्यथा वनं
पात्रेव भिन्दन् सत एति रक्षसः ॥
ऋ.७।१०४।२१ ।

देवता-इन्द्रः । ऋषिः-वसिष्ठः, छन्दः-जगती । इन्द्रः =ऐश्वर्यवान् प्रतापी वा नृपः । हविर्मथीनाम्= हविर्यज्ञार्थं द्रव्यं मथ्नन्तीति तेषाम् । अभ्याविवासताम्=अभिक्रम्य सर्वतो विनाशकारिणाम् । यातूनाम् =प्रजाभ्यो यातनादायिनां रक्षसाम=दुर्जनानां पराशरः=नाशकः । अभवत्=भवति भवतु वा । अथवा—आविवासताम्=त्वां परिचरताम् तव भक्तानां हवींषि ये मथ्नन्तीति तथाविधानां यातूनां पराशरः=विनाशकः । भवतीति विश्वासं भवत्विति चाभ्यर्थनां व्यनक्ति । स हि शक्रः=रक्षसा दलने शक्तः इन्द्रः । रक्षसो राक्षसान् हन्तुमिति शेषः । रक्ष्यतेऽस्मादिति रक्षधातोः असुन् प्रत्यये रूपम् । तथा अभीदु एति= तथा अभ्येत्येव । अभि+इत्+उ इति पदच्छेदः । अभि=आभिमुख्यार्थे । इत्=एवार्थे । उ=विनिश्चयार्थे पदपूरणाय वा निपातः । कथमभ्येति ? यथा परशुः=परशुहस्तः पुरुषः वनं छेत्तुम । इह छेत्तु-

मिति योज्यम् । जडस्य परशोरागमनमनुपपद्यमानं परशुपाणि पुरुषं लक्षयति । सम्मुखागतस्य वृक्षस्यच्छेदने यथा परशुः छिन्द्यां न वा छिन्द्यामिति विकल्पं न करोति तथा स राक्षसान् नाशयत्येवेति निश्चयोऽत्र व्यज्यते । अथवा स शक्रः पात्रेव भिन्दन्=पात्राणीव भिन्दन् । यथा कश्चिदपरः कुम्भकारस्य भङ्गुराणि भाजनानि हेलयैव भिन्दन् समागच्छति तथा स रक्षसः=प्रजापीडकान् जनान् नाशयितुं सतः=सुदूरप्रदेशादपि । एति=अवश्यमागच्छति । इदि परमैश्वर्ये । इन्धिदीप्तौ इन्दतेः इन्धतेर्वा र प्रत्यये रूपम् । 'ऋज्रेन्द्राग्रवज्रविप्रकुब्रचुब्रक्षुरभद्रोग्रभेरभेलशुक्रशुक्ल गौरवध्रेरा मालाः' इत्युणादि (१८६) सूत्रेणनिपात्यते । शक्रः शक्नोतेः । 'स्फायि तञ्चिवञ्चिशकि.,' इत्युणादि (१७०)सूत्रेण रूपसिद्धिः । पराशरः=पराशातयिता यातूनाम् । यातु–यातयतिर्वधकर्मा (निघण्टौ. २.१९)सतः=संसृतं भवति (निरुक्ते ३.४.२०), दूरगतं भवतीत्यर्थः । इह परशुर्यथा वनम् इति, पात्रेव भिन्दन् इति चेत्युपमाद्वयम् । पराशरपदमिह यौगिकं न तु लोके भगवद्व्यासपितृत्वेन प्रसिद्धस्य पुरुषविशेषस्य नाम । तदुच्यते–

पराशरपदं व्यक्तिविशेषस्य न वाचकम् ।
परशातनकर्त्रर्थं मन्त्रेऽस्मिन्यौगिकं हि तत् ।।८५
तथैश्वर्यातिरेकेण प्रकर्षात्तेजसोऽथवा ।
इन्दते रिन्धतेर्वेन्द्र आत्मा राजेश्वरोऽथवा ।।८६।।
शक्नोतेश्च नृपः शक्रः शक्तः पालयितुं प्रजाः ।
मध्यस्थानोऽथवा देवः शक्तस्त्रातुं जलैर्जगत् ।।८७।।

मध्यस्थानदेवतास्विन्द्रो निरुक्ते पठितः । इरां ददाति, इरां दधाति । इन्धेभूतानि । यद् एनं प्राणैः समैन्धनं स्तदिन्द्रस्येन्द्रत्वम् । इन्दते र्वैश्वर्यकर्मणः । इन्दन् शत्रूणां दारयिता वा । इति सर्वत्र यास्कः । अथवा इरां जलं दृणाति खण्डयति द्वयोस्तत्त्वयो रुदजनौषजनरूपयोरिति । विद्युद्द्वाराप्रवेशेन जलं द्वयोस्तत्त्वयोर्विदीर्णं भवति । इराजलम् । 'इरा भूवाक्सुराम्बुषु ।' इति मेदिनी । दक्षिणदिशोऽधिपत्यर्थे त्विन्द्रपदं रूढम् । तदुक्तम्–दक्षिणादिगिन्द्रोऽधिपतिः ।। अथवा–

यः प्राणतो निमिषतो महित्वै-
कइद्राराजा जगतो बभूव ।
य ईशे अस्य द्विपदश्चतुष्पदः
कस्मै देवाय हविषा विधेम ।।
ऋ.१०-१२१-३ ।

देवताः=कः (प्रजापतिः), ऋषिः–हिरण्यगर्भः प्राजापत्यः। छन्दः=त्रिष्टुप् । यः=प्रजापतिः । प्राणतः =जीवनवनश्चेतनस्य । निमिषतः=अचेतनस्य च जगतः=विश्वस्य । महित्वा=स्वालौकिकमहिम्ना । एक इत् राजा बभूव=एक एव=स्वसदृशद्वितीयरहितः स्वामी बभूव=आसीत् अस्ति भविष्यति च । परमात्मसम्बन्धिना बभूवेत्यनेन कालत्रयस्य ग्रहणम् । तस्य नित्यत्वात् । योऽस्य द्विपदः=पादद्वययुक्तस्य मनुष्यादेः । चतुष्पदः=चरणचतुष्टयवतो गवाश्वादेश्च सर्वस्य जगतः । ईशे=ईष्टे=प्रभवति=स्वाम्यस्ति । तथाविधाय कस्मै=वाङ्मनसागोचराय निरुपाख्यरूपायेत्यर्थः । हविषा=भक्तिरूपेण हव्येन विधेम=परिचरेम । इह प्राणितीति प्राणन् तस्य प्राणतः=प्र+अन प्राणने+शतृ प्रत्यये षष्ठ्यन्तं रूपम् । नि+मिष+अक्षि संकोचे धातोः+शतरि रूपम् । राजा=राजतेः रञ्जतेर्वा कनिन् प्रत्यये साधुः (उणादि १-१४५)। निमिषतः इत्यनेन यद्यपि पक्ष्मपातरहितस्येत्युक्तं भवति तथापि मन्त्रान्तर्गतस्य प्राणतः इति पदस्य सान्निध्यात् तत्प्रतिकूलस्य अप्राणतोऽचेतनस्येत्यर्थस्य ग्रहणमुचितम् । इह प्राणतः इत्यादीनि पदानि यौगिकानि । द्विपदश्चतुष्पदः इत्यत्र संख्यासुपूर्वस्य (पाणि. ५-४-१४०) इति सूत्रेण पादस्यान्त्यस्य लोपस्ततश्च भसंज्ञायां पादः पत् (पाणि. ६-४-१३०) इत्यनेन पादस्य पद्भावः । गच्छ-

तीति जगत्। सर्वदा परिवर्तनात्। अथवा कमिति सुखनाम तस्मै सुखस्वरूपायेत्याशयः। असर्वनाम्नोऽपि सर्वनामत्वं छान्दसम्।

अथ रूढं पदम्--

प्रकृतिप्रत्ययाद्यर्थनैरपेक्ष्येण सर्वथा।
समुदायस्य शक्त्यैव स्वकीयार्थसमर्पकम् ।।८८।।
अव्युत्पन्नं पदं रूढं तद् द्वितीयप्रकारकम्।
यथा डित्थ डवित्थादि यथा वाखण्डलादिकम् ।।८९

यद्यपि दशरथदेवदत्तरामरोहितादिपदानां प्रकृतिप्रत्ययादिविश्लेषणपूर्वकं व्युत्पत्तिः सुशका तथापि तत्र व्युत्पत्तिलभ्येनार्थेन न किमपि प्रयोजनं तेषां संकेतमात्रफलकत्वात्। तद् विवृणोति--

अन्यो व्युत्पत्तिलभ्योऽर्थो, निमित्तमपरस्तथा-
प्रवृत्तेरिह शब्दानाम्, सर्वत्र नैकता तयोः ।।९०।।
अस्ति व्युत्पत्तिलभ्योऽर्थो यो गच्छति स गौरिति,
तथापि सर्वं गच्छन्तमभिधत्ते न गोपदम् ।।९१।।
प्रसज्येताऽन्यथा-शेते गौ-रित्यत्राऽपि लक्षणा।
बाध्यते शयनं यस्मात्साकं गमनकर्मणा ।।९२।।
पिण्डे सास्नादिमत्येव तत्प्रवृत्तिनिमित्तता।
सीमिता तेन गच्छन्तमश्वं नाभिदधाति तत् ।।९३।।
तत्=गोपदमित्यर्थः।

स्यात्प्रवृत्तिनिमित्तस्य बाधेऽर्थस्य तु लक्षणा।
न तु व्युत्पत्तिलभ्यस्य केवलस्येति सुस्थितम् ।।९४
व्युत्पत्तिलभ्यताऽर्थस्य प्रवृत्तेश्च निमित्तता।
यौगिकेषु पदेष्वेत्र द्वयमेकत्र संगतम् ।।९५।।
पित्रादिकृतसंकेते रूढे वा व्यवहारतः।
पदं व्युत्पत्तिलभ्योऽर्थो भवन्नप्यविवक्षितः ।।९६।।

तदुदाहरति--सप्त त्वा हरितो रथे वहन्ति देव सूर्य। शोचिष्केशं विचक्षण। ऋ. १-५०-८ देवता=सूर्यः ऋषिः=प्रस्कण्वः काण्वः। छन्दः= गायत्री। हे विचक्षण देव=सर्वस्य द्रष्टः प्रकाशयितो वा द्योतमान। सप्तसंख्याका हरितः=सप्तवर्णारश्मयस्तन्नामानोऽश्वा वा। शोचिष्केशं=शोचींषि तेजांसि केशा इव यस्येत्युपमा। शोचींष्येव केशा यस्येति रूपकं वा। तथाविधं त्वां रथे तिष्ठन्तं वहन्ति। सूर्ये देवत्वारोपात् तस्य केशादिभिः, रथेन च सम्बन्धो नाऽनुपपन्नः। सूर्य पदं भान्वर्थे बहुशः प्रयुक्तं, लोके प्रसिद्धं कोशेषु च तदर्थकेषु शब्देषु पठितं तस्माद्रूढम्। 'सूर सूर्यर्यमादित्यद्वादशात्मदिवाकराः।' इत्यमरः। 'स्युः प्रभारुग्रुचिस्त्विड्भाभाश्छविद्युतिदीप्तयः। रोचिः शोचिरुभे क्लीबे।' इत्यमरः। 'हरिद् दिशि स्त्रियां पुंसि हयवर्णविशेषयोः' इति मेदिनी।

तथा--

सर्वं तद्राजा वरुणो विचष्टे
यदन्तरा रोदसी यत् परस्तात्।
संख्याता अस्य निमिषो जनाना-
मक्षानिव श्वघ्नी निमिनोति तानि ।।
अथर्व. ४।१६।५।

देवता=वरुणः। ऋषिः-ब्रह्मा। छन्दः=भुरिक् त्रिष्टुप्।

यत् किंचिद् अन्तरा रोदसी=द्यावापृथिव्योरन्तराले। ततोऽपि परस्ताद् वा विद्यते तत् सर्वं राजा वरुणो विचष्टे=पश्यति। जनानां निमिषः अस्य संख्याताः। निपूर्वस्य मिषतेः 'संपदादिभ्यः क्विप्' इतिवार्तिकेन स्त्रियां भावे क्विप् प्रत्यये रूपम्। प्रतिपुरुषं तस्य नयननिमीलनोन्मीलनयोरियत्तामपि स जानाति। निमेषोन्मेषयोः संख्याज्ञानद्वारा प्राणिनामायुषः परिमाणं पुण्यपापादिकं च सर्वं स वेत्तीति भङ्ग्यन्तरेण प्रतिपादनात् पर्यायोक्तालंकारः। पर्यायोक्तं यदा भङ्ग्या गम्यमेवाभिधीयते ।। सा.द.परि.१०। वरुणः पश्चिमदिशोऽधिपतिः प्राणिनां कृतमकृतं वा सर्वं पश्यति पापिनश्च स्वपाशैर्बध्नाति।

तदुक्तम्--

प्रतीचीदिग्वरुणोऽधिपतिः पृदाकु..।।
अथर्व काण्ड ३ सू. २७ म. ३।

उदुत्तमं वरुण पाशमस्मदवाधमं विमध्यमं श्रथाय ।
अथा वयमादित्य व्रते तवानागसो अदितये स्याम ।।
ऋ. १।२४।१५ ।

अपिच--

शतेन पाशैरभिधेहि वरुणैनं
मा ते मोच्यनृतवाङ् नृचक्षः ।
आस्तां जाल्म उदरं श्रंसयित्वा
कोश इवाऽबन्धः परिकृत्यमानः ।।
अथ. ४।१६।७ ।

'प्रचेतावरुणःपाशी यादः पतिरपांपतिः ।' इत्यमरः ।
वरुणपदमिह रूढम् ।

यथा वा-

अपां मध्ये तस्थिवांसं तृष्णा विदज्जरितारम् ।
मृडा सुक्षत्र मृडय ।। ऋ. ७।८९।४ ।

देवता-वरुणः । ऋषिः-वसिष्ठः । छन्दः=गायत्री ।

हे वरुण देव अपां मध्ये तस्थिवांसमपि माम् । जरितारम्=तव स्तोतारम्=भक्तमित्यर्थः । तृष्णा अविदत्=पिपासा पीडयतीत्यद्भुतम् । हे सुक्षत्र= क्षतात् शोभनत्रातः=दुःखापहारक देव । मां मृड= मां सुखय । मृडय=मया निमित्तभूतेन अन्यानपि- मद्विधान् पीडितान् सुखय । सर्वतो जलानां मध्येऽ- वस्थितस्य पिपासा विरुद्धा । अस्य परिहारपक्षे तु अपः=कर्मनाम (निघण्टौ १-१२) दिवानिशं लौकिककर्मपाशबद्धोऽहमुचितानुचितोपायैर्धनोपार्जन- परायणो विविधविषयसेवनतत्परोऽपि तृप्तिं न लभे । प्रत्युत विषयैः परिवृतस्याऽपि मम कामा उत्तरोत्तरं वर्धन्त एव । तदुक्तं मनुना-

न जातु कामः कामानामुपभोगेन शाम्यति ।
हविषा कृष्णवर्त्मेव भूय एवाऽभिवर्धते ।। मनुस्मृ.

तृष्णाशमनहेतूनामपां मध्ये स्थितस्याऽपि- तृष्णा न शान्तेति सति हेतौ फलाऽभावरूपा विशे- षोक्तिः । अथवा विभावना विशेषोक्त्योः सन्देह- संकरः । तदुक्तं रसगंगाधरे विशेषोक्तिनिरूपण- प्रकरणे--

भगवद्वदनाम्भोजं पश्यन्त्या अप्यहर्निशम् ।
तृष्णाधिकमुदेतिस्म गोपसीमन्तिनीदृशः ।।

लोके ह्यसन्निकर्षस्तृष्णा कारणम् । तदभावे= सन्निकर्षेऽपि तृष्णोपनिबद्धा, (इति हेत्वभावेऽपि फलोत्पत्तिरूपा विभावना) तथा सन्निकर्षस्तृप्ति कारणम् तस्मिन् सत्यपि तृप्त्यभावो बोधितः (इति सत्यपि हेतौ तत्फलाभावप्रतिपादनाद् विशेषोक्तिः) परन्तु कारणाभावकार्याभावयोर्न प्रागुक्तप्रकारेण प्रतिपादनमित्यार्थत्वमेव तदुभयसंशयसंकरस्य । इह 'अपाम्' इति पदे श्लेषस्तेन प्रथमं प्रसिद्धतरस्य जलरूपस्यार्थस्योपस्थितिस्ततस्तस्य बाधे विषय- भोगसाधनसंपादकस्य कर्मरूपस्यापरार्थस्य । वरुणपदमिह पूर्वोक्तदेवताविशेषार्थे रूढम् ।

अथ योगरूढं पदम्--

यस्याऽवयवशक्त्योक्तो यौगिकोऽर्थोऽति विस्तृतः ।
रूढ्या नियम्यते योगरूढं तत्पदमुच्यते ।।९७।।
योगेन पंकजं पंकजनिकर्त्रर्थबोधकम् ।
पद्मे नियन्त्रितं रूढ्या न भवेत्कुमुदार्थकम् ।।९८।।

कुमुदभेकादीनामपि पंकोद्भवत्वात् तत्रापि योगेन प्रसक्तं पंकजपदं योगरूढ्या पद्ममात्रे निय- न्त्रितं सद् अर्थान्तरं नाभिधत्ते । कदाचित्.. 'दिशि दिशि जलजानि सन्ति कुमुदानि,' इत्यादि प्रयोगेषु जलजादिपदैर्जलजन्यरूपयौगिकार्थबोधे तु लक्षणाश्रयणीया । मुख्यस्य रूढार्थस्य बाधात् । योगरूढमुदाहरति--

सूयवसाद् भगवती हि भूया
अथो वयं भगवन्तः स्याम ।
अद्धि तृणमघ्न्ये विश्वदानीं
पिब शुद्धमुदकमाचरन्ती ।।
ऋ. १।१६४।४० ।

देवता=अघ्न्या गौः । ऋषिः=दीर्घतमा औचथ्यः । छन्दः=त्रिष्टुप् ।

अघ्न्ये=हे अहन्तव्ये धेनो त्वं सुयवसं=शोभनं शष्पादिकम् उपभुज्य प्रभूतपयोरूपधनवती भूयाः ।

'ल्यब्लोपे कर्मण्यधिकरणे च ।' इति वार्तिकेन सुयवसाद् इत्यत्र कर्मणि पञ्चमी । अथ त्वत्सम्बन्धेन वयमपि भगवन्तः=सुखसमृद्धिसंपन्नाः स्याम । अस्माकमेवमुपकारिणी त्व वनेषु यथाकामं विचरन्ती । विश्वदानीं=सर्वदा । तृणमद्धि शुद्ध मुदकं च पिब । इह अघ्न्यापदं धेन्वर्थे रूढम् । नञ् पूर्वकस्य हन्तेः 'अघ्न्यादयश्च ।' उणा. ५.६१ सूत्रेण यक् प्रत्यये निपातनात् साधु । अघ्न्याऽहन्तव्या भवति, अघघ्नीति वा इति निरुक्ते । मन्त्रमिमं यास्को माध्यमिक वाक्परकतया व्याचष्ट । माध्यमिकवाक् विद्युद्रूपा वृष्ट्यां दुर्भिक्षादिरूपम् अघं हन्तीति । पदमिदमवयवानां शक्त्या सर्वेषाम् अहन्तव्यानां वाचकमपि रूढया धेनौ नियन्त्रितम् । एवमघ्न्यापदस्य गोवाचकत्वे अवयवशक्ते रूढेश्चेत्युभयोर्योगः ।

यस्मादृते न सिध्यति यज्ञो विपश्चितश्चन ।
स धीनां योगमिन्वति ।। ऋ. १।१८।७ ।

देवता–सदसस्पतिः । ऋषिः=मेधातिथिः काण्वः । छन्दः=गायत्री ।

हे सदसस्पते=यज्ञात्मकसदसः प्रधानपर्यवेक्षक ! यस्मादृते विपश्चितोऽपि यज्ञो न सिध्यति=शास्त्रविदोऽपि यज्ञः साफल्यं नाप्नोति । स सदसस्पतिरेव यज्ञस्य ब्रह्मा तादृशः कश्चनाऽन्यः प्रमुखो वा । धीनाम्=यज्ञेऽनुष्ठेयानां कर्मणां योगं=सम्यक् प्रयोगम् । इन्वति व्याप्य तिष्ठति । धीति कर्मनाम (निघ. २।१)। तदुक्तम्––ब्रह्मा त्वो वदति जात विद्याम् । स हि प्रतिपदं समुचितनिर्देशैः ऋत्विजः स्वे स्वे कर्मणि प्रमादेभ्यो रक्षति । उच्यतेलोकेऽपि–अधीत्य शास्त्राणि भवन्ति मूर्खा, यस्तु क्रियावान् पुरुषः स विद्वान् । इति । इन्वति=इविव्याप्तौ धातोः, इदितोनुम् धातोरित्यनेन नुमि लटि शपि रूपम् । इह यज्ञपदं यजदेवपूजासंगतिकरण दानेषु–इति धातोर्नङ प्रत्ययान्तम् अवयवानां शक्त्या देवपूजासत्समागमाद्यनेकार्थवाचकमपि रूढया यागमात्रे नियन्त्रितम् । तेन योगरूढम् । एवम्––

ऋचां त्वः पोषमास्ते पुपुष्वान्
गायत्रं त्वो गायति शक्वरीषु ।
ब्रह्मा त्वो वदति जातविद्यां
यज्ञस्य मात्रां विमिमीत उ त्वः ।।
ऋक् १०।७१।११।

देवता=ज्ञानम् । ऋषिः=बृहस्पतिराङ्गिरसः । छन्दः=त्रिष्टुप् ।

मन्त्रेऽस्मिन् यज्ञस्य चतुर्णामृत्विजाम्–होतुः, उद्गातुः, अध्वर्योः, ब्रह्मणश्च कर्मणां विनियोग उक्तः । त्वः=एको होतृपदवाच्यः ऋत्विग् ऋचां पोषं पुपुष्वान् आस्ते=ऋचोऽधीयानस्तिष्ठति । यथावसरं यथानुष्ठानं विशेषर्चामुच्चारणमेव तासां पोषः । त्वः–अन्यः उद्गाता, शक्वरीषु=ऋक्षु । गायत्रं गायति=सामगानं करोति । त्वः=एको ब्रह्माख्यः ऋत्विग् जाते जाते=कर्मणि कर्मणि, कदाचित्तद्व्यतिक्रमेवाविद्याम् = प्राप्तकालम् अनुष्ठेयं वदति । उ त्वः=अप्येकोऽध्वर्युः यज्ञस्य मात्राम्=इतिकर्त्तव्यताम् । विमिमीते=विनिश्चिनोति । यज्ञपदं 'यजदेवपूजासंगतिकरणदानेषु । इति धातोः=यजयाचयतविच्छप्रच्छरक्षोनङ (पाणि. ३।३।९०) इति सूत्रेण भावे नङि प्रत्यये कृते सिध्यति । 'भावेऽकर्तरि कारके चेति वर्तते ।' तेन इज्यते यज्ञः । इति । सिद्धान्तकौमुदी व्याख्यायां श्रीज्ञानेन्द्रसरस्वतीमहोदयाः । पदमिदमवयवानां शक्त्या देवपूजनसंगतिकरणाद्यनेकार्थकमपि रूढया यागार्थे नियन्त्रितत्वाद् योगरूढम् । किन्तु–

यज्ञेन वाचः पदवीयमायन्
तामन्वविन्दन् ऋषिषु प्रविष्टाम् ।
तामाभृत्या व्यदधुः पुरुत्रा
तां सप्तरेभा अभिसंनवन्ते ।।
ऋ. १०।७१।३ ।

देवता=ज्ञानम् । ऋषिः=बृहस्पति राङ्गि-रसः । छन्दः=त्रिष्टुप् ।

भाषातत्त्वविदो जनाः, यज्ञेन=विभिन्नभाषाविद्भिः सह सङ्गमेन । वाचः=वाण्याः समुद्भवस्य प्रसारस्य च सरणिम् । आयन्=लभन्ते । पदेन यातव्यः पन्थाः पदवीयः इति वेदभाष्ये श्रीसायणः । ते विद्वांस एव ऋषिषु प्रविष्टां तामन्वविन्दन्=सा मूलभाषा लघुजनसमाजे विहितात्मलाभा कालक्रमेणोच्चारणभेदानर्थभेदांश्चानुभवन्ती कथं विभिन्नदेशानाम् ऋषिषु=तत्प्रथमप्रयोक्तृषु नानारूपैः पल्लविता पुष्पिता च भवतीत्यन्वविन्दन्=विनिश्चिन्वन्ति । तां मूलभाषाम्, आभृत्य=आहृत्य=अङ्गीकृत्य तद्व्यवहर्तारः, पुरुत्रा व्यदधुः=विभाषासु विभक्तां विदधति । तां च वाचम् सप्तरेभाः=प्रथमाद्वितीयाप्रभृतयः सप्त विभक्तयः, सङ्गीतशास्त्रे षड्जर्षभगान्धारप्रभृतयः सप्तस्वराः सप्तोच्चारणप्रदेशा वा अभिसंनवन्ते=संगच्छन्ते सेवन्ते वा । 'उरः कण्ठः जिह्वाया मूलं मूर्द्धा च तालु च । नासिकौष्ठौ च वर्णानां सप्तामी प्रभवा मताः ॥' मन्त्रेऽस्मिन् यज्ञपदं न योगरूढं किन्तु यौगिकम् । योगरूढार्थस्य यागस्य भाषाविज्ञानेन सम्बन्धाभावात् । रेभृ शब्दे धातोर्निष्पन्नो रेभशब्दः शब्दत्वसम्बन्धेन पूर्वोक्तान् विभक्त्यादिरूपमर्थम् कण्ठादीन् प्रदेशांश्चोत्पाद्योत्पादकभावसम्बन्धात्प्रकटयति ।

यज्ञेन यज्ञमयजन्तदेवा-
स्तानिधर्माणि प्रथमान्यासन् ।
ते ह नाकं महिमानः सचन्त
यत्र पूर्वे साध्याः सन्ति देवाः ॥

देवता=साध्याः । ऋषिः=दीर्घतमा औचथ्यः । छन्दः=त्रिष्टुप् ।

देवाः = दिव्यभावनाभिर्भावितान्तःकरणाः भक्ता ज्ञानिनो योगिनः कर्मयोगिनो वा । यज्ञेन=भक्तिपूर्वकं भगवच्चरणयोः समर्पितेन, निरस्त समस्ताऽहंभावेन स्वात्मना यज्ञम्=यष्टव्यं प्रभुं नारायणम् । अयजन्त=यजन्ति पूजयन्ति सेवन्ते वा । यज्ञः स्यादात्मनि मखे नारायणहुताशयोः ।' इत्यनेकार्थ संग्रहे हेमचन्द्राचार्याः । अथवा ये देवाः=दिव्यगुणवन्तः सन्तः । यज्ञेन=यज्ञभावनयाविहितेन ज्ञानयज्ञेन यज्ञम्=सर्वव्यापकं सर्वरूपं विष्णुम् यजन्ति भजन्ते ते दैवं यज्ञं समाचरन्ति । जगतोविध्वंसाय परमाण्वायुधादिनिर्माणार्थमन्वेषणमासुरमनुष्ठानं न दैवो यज्ञः । देवा=प्राणाः इन्द्रियाणि वा । 'देवो मेघे सुरे राज्ञि स्यान्नपुंसकमिन्द्रिये ।' इति मेदिनी । इन्द्रियवृत्तीनां संयमाग्नावाहुतिः, ताटस्थ्येन केवलज्ञानोपार्जनाय न तु विषयसेवनाभिलाषेण विषयाणामिन्द्रियेष्वाहुतिर्वा दैवो यज्ञः । प्राणा वा देवपदवाच्याः । प्राणायामपरायणाः साधकाः अपाने प्राणम् प्राणे चापानं जुह्वतो रेचकपूरकाभ्यां तयोरुभयोर्गतिं रुद्ध्वा च कुम्भकेन ।

(क्रमशः)

अकारादिध्वनीनां रेखाकृतिस्वरूपम् (लिपिः)

(भाषाविज्ञान-भौतिकविज्ञान-तन्त्रशास्त्रसमन्वितम्)

श्री डा० रामनारायणदासः नव्यव्याकरणाचार्य विद्यावारिधिः (पी-एच. डी.) वाराणसी

(अत्र भाषाविज्ञानदृशा लिपितत्त्वं विमृश्य तत्र भौतिकविज्ञानं तन्त्रशास्त्रञ्च आश्रित्य स्वविचारः समुपस्थापयिष्यते ।)

बहिर्जगति व्यवह्रियमाणं द्विधा ध्वनितत्त्वं परिलक्ष्यते । १–रेखया अङ्कितं स्वरूपम् २–उच्चारणात्मकम्, यद्वा अभिव्यक्तात्मकम् । अत्र रेखया अङ्कितस्यैव स्वरूपस्य परिचयः प्रदास्यते ।

दार्शनिका वैयाकरणा ध्वने रेखया अङ्कितमपि (लिप्यात्मकम्) स्वरूपं स्वीकुर्वन्ति । तदुक्तं श्रीभर्तृहरिणा वाक्यपदीयस्य ब्रह्मकाण्डे––

यत्र वाचो निमित्तानि चिह्नानीवाक्षरस्मृतेः ।
शब्दपूर्वेण योगेन भासन्ते प्रतिबिम्बवत् ॥२०॥

यस्मिन् स्फोटे अक्षरस्मृतेः चिन्हानि इव लिपय इव वाचो निमित्तानि घटपटादिवाचां कारणानि शब्दपूर्वेण शब्दाभिव्यक्तिपूर्वभाविध्वनिना योगेन सम्बन्धेन प्रतिबिम्बवद् भासन्ते, स स्फोट इति भर्तृहरिप्रोक्तकारिकाया अर्थः। अकाराद्यक्षराणां स्मारकत्वाल्लिपिरपि तेषां स्वरूपं स्वीक्रियतेऽस्माभिः भाषा वैज्ञानिका ष्टर्टेवाण्ट महोदया अकारादिध्वनेरुच्चारणात्मक स्वरूपापेक्षया रेखयाङ्कितस्य स्वरूपस्य अधिकं महत्वं व्या१चक्षते । भाषाशास्त्रिभिरैतिहासिके लिपिविषये बहवो विचाराः प्रदर्शिताः । तद्यथा केचिद् विचारा अधस्तात् प्रस्तूयन्ते––

"अकाराद्यक्षराणां द्विधाकृतिः अकारादिवर्णानामुच्चरणक्षणे मुखम् याम् आकृति भजते सा प्रथमा कृतिः । द्वितीया च आकृतिः रेखया कर्गलादिपत्रेषु निर्मीयते । इयमेवाकृतिर्लिपिनाम्ना प्रोच्यते । जगति वर्णानां यावन्त्यो लिपयो दृश्यन्ते, तासां मध्ये वैदिकलिपिरकाराद्यक्षरार्थानुरूपा । रोमनलिपिस्तु एतादृशं गुणं न भजते ।

हस्ताङ्गुलिगृहीतलेखनीव्यापारेण लिप्यात्मकस्वरूपस्याभिव्यवितर्जायते । चक्षुरिन्द्रियेण च तस्य ग्रहणं क्रियते । तत्तद् वर्णानां लिप्यात्मकं स्वरूपं चक्षुषा परिगृह्य "एतेन लिप्यात्मक स्वरूपेणायं वर्ण उच्चारयितव्यः" इति बुद्ध्या निश्चित्य तेषामुच्चैर्यद्वा मनसि उच्चारणं क्रियते । नारदस्मृतौ तु वर्णानां लिप्यात्मकं स्वरूपं चक्षूरूपेण स्मृतम् । तद्यथा––

नाकरिष्यद् यदि ब्रह्मा लिखितं चक्षुरुत्तमम् ।
तत्रेयमस्य लोकस्य नाभविष्यच्छुभा गतिः ॥

अस्यायं भावः मनीषिभिः शास्त्रं चक्षुरिति प्रोक्तम् । श्रुतिस्मृत्यादि रूपचक्षुषा दृष्ट्वा यागादिकं क्रियते । यागादिकर्म श्रुतिस्मृत्यादिषु प्रोक्तम् । तत्र श्रुतिस्मृतिषु वर्णातिरिक्तं न किमपि वस्तुतत्त्वं विद्यते । वर्णानाञ्च उच्चारणानन्तरं स्थितिर्नोपलभ्यते । लिप्यात्मकस्वरूपाभावे उच्चार्यमाणवर्णानां क्षणावस्थायितया कतिपय-कालानन्तरं श्रुतिस्मृत्युक्तवर्णानां विस्मरणाद् यागादिकर्मानुष्ठानस्यापि लोपापत्तिः स्यात् । अतो ब्रह्मा उच्चार्यमाणश्रुतिस्मृतिरूपचक्षुषोतिरिक्तमपरं लिखितं चक्षुर्निर्ममे ।

---

1. Here is a widespread impression that the written word is the norm or model of human speech while the spoken word is a more or less faltyimitation E. H. sturtevart linguistic change P. N. I.

यद्यपि भाषा भेदानुसारेण लिपिभेदो दृश्यते। तथाऽपि विभिन्नलिपिचिन्हेन एक एव वर्णः स्मर्यते । यथा क- देवनागरलिप्याम् तेलगुलिप्याम् ग्रन्थलिप्याम् वङ्गलिप्याम् विभिन्नचिन्हेन एक एव वर्णः स्मर्यते, नान्य । परन्तु कासुचिल्लिपिषु तु एकेनैव चिन्हेन वहवो वर्णाः स्मर्यन्ते । तद्यथा आङ्गलभाषायां Cइति चिन्हेन केन्द्रार्थवाचकसेण्टर center शब्दे सकारस्य छिदिर् धात्वर्थक कट cut शब्दे च कवर्णस्य स्मृतिर्जायते ।

लिपिं दृष्ट्वा सर्वो जनो वर्णं स्मर्तुं न शक्नोति किन्तु लिपिज्ञानवत्येव अक्षरस्मृतिर्जायते । यथा वृद्धव्यवहारेण घटादिशब्दानां कम्बुग्रीवादिरूपार्थेषु गृहीतशक्तिकस्यैव शाब्दबोधो जायते, नान्यस्य । तथैवरीत्या इयं लिपिरस्यवर्णस्य स्मृतिजनिका, इयञ्च अस्य वर्णस्य, इत्येवं वृद्धव्यवहारेण गृहीत स्मृतिजनकशक्तिकस्यैव तत्तद्वर्णानां लिपिचिन्हस्य दर्शनेन तेषां स्मृतिर्जायते । अत एव देवनागर्यादिलिपिवृत्तिस्मृतिजनकशक्तिग्रहविहीनस्य लिपिं चक्षुषा पश्यतोऽपि वर्णस्मृतिर्न सम्भवति । वस्तुतस्तु इदं सर्वं जगद् शब्दस्य स्मृतिजनकं लिप्यात्मकं रूपमिव प्रतिभाति । कम्बुग्रीवादिमद्घटादि पदार्थं दृष्ट्वा "घटः सुन्दरः, पटः कुरूपो विद्यते" इत्यादि वाक्यात्मकशब्दमुच्चारयितुमिच्छा जायते । परन्तु यथावयवसन्निविष्टाङ्गं जनं दृष्ट्वा, घटरूपं वा दर्शं दर्शं विभिन्नजनैर्विभिन्नवर्णाः समुच्चार्यन्ते, न तु निश्चयरूपेण एक एव वर्णः एक एव शब्दो वा उच्चार्यते । अतो लोकव्यवहाराय अकारादिवर्णस्मृतिजनकस्य एतादृशचिन्हद्वयस्यावश्यकता जाता, यद् एकेन चिन्हेन एकस्यैव वर्णस्य उच्चारणं स्यात्, नान्यस्य । यथा 'क' इति चिन्हेन 'क'वर्णस्य, 'ख' इति रेखया 'ख' वर्णस्य स्मृति जायते ऋगादिवेदमन्त्राणाम् उदात्तादिस्वराणाञ्च सुरक्षणार्थं ब्रह्माअकारादिवर्णानां स्मृतिजनकं लिखितं चक्षुर्निर्ममे, या ब्रह्मलिपिरित्यपरनाम्नाऽभिधीयते ।

लिपिपर्यायवाचिशब्दः——

लिखितम अक्षरविन्यासः, लिपिः, लिविः, अङ्कितम्, चिन्हम्, रेखाकृतिः, इत्येते शब्दा लिप्यर्थे प्रयुज्यन्ते । एतेषां मध्ये लिपिशब्दो लोकेऽतिशयेन लिखिताक्षरार्थे व्यवह्रियते । तत्राद्याः पर्यायवाचिशब्दा अमरकोषे निर्दिष्टाः समुपलभ्यन्ते । यथा——

लिखिताक्षरविन्यासे, लिपिर्लिविरुभे स्त्रियौ[1]।
लिख्यते स्म इति लिखितम्, न क्षरन्तीत्यक्षराणि, विन्यसनं विन्यासः, अक्षराणां विन्यास अक्षरविन्यासः। लिखितञ्च अक्षरविन्यासश्च अनयोः समाहारे लिखिताक्षरविन्यासम् तस्मिन्निति अक्षरविन्यासे । लिप्यते इति लिपिः, लिविः गौत्रौ धातू, लिव्यते इति लिविः, उभे स्त्रियौस्याताम् । एवंलिखिताक्षरविन्यासलिपिलिविशब्दानां क्रमशो व्याख्यानं वेदितव्यम् । एतेषां मध्ये यद्यप्यक्षरविन्यासशब्दो लिप्यर्थे विद्यते तथापि केवलमक्षरशब्दोऽपि लिप्यर्थे दृश्यते । अक्षरशब्दस्य लिप्यर्थे विद्यमानादेव लेखकार्थे अक्षरचणशब्दः प्रयुज्यते । तथाचोक्तम् अमरकोष——

"लिपिङ्करो लिपिकरोऽक्षरचणोऽक्षरचुञ्चुश्चलेखके[2]"

---

१. अमरसिंहकृत अमरकोषः द्वितीयकाण्डम्-क्षत्रियवर्गः
श्लो० सं०, १६

२. अमरकोषः द्वितीयकाण्डे क्षत्रवर्गः
श्लोक सं० १५

अक्षररचणशब्दस्य 'अक्षरेणचण: वित्त: प्रतीत:' इत्यर्थे 'तेन वित्तश्चुञ्चुपूचणपौ' इत्यनेन पाणिनीयसूत्रेण चणप् प्रत्ययेऽनुबन्धलोपे च अक्षररचणशब्दस्य निष्पत्तिर्जायते । यदिग्रक्षरचणशब्दे अक्षरपदेन वर्णानां ध्वन्यात्मकस्वरूपस्यैव ग्रहणं क्रियते, तर्हि "उच्चरितवर्णेन वित्त:" इत्येव अक्षररचणशब्दस्य तात्पर्यं स्यात्, न तु 'लिखितवर्णेन वित्त:' इति तस्य स्वारस्यं संलभते । ततश्च अमरकोषोक्तिर्व्यर्था स्यात् । अक्षरशब्देन लिखितवर्णस्वरूप ग्रहणे तु लिपिकरार्थे अक्षररचणशब्दो युज्यते ।

चिन्हम् —

लिपरेपरं नाम विद्यते चिन्हमिति । चाहयति चह्यतेऽनेन वेति चिन्हम् । लिप्यर्थे चिन्हशब्दस्य प्रयोगोभर्तृहरिणा कृत: ।

यथा —

'यत्रवाचोनिमित्तानि चिन्हानीवाक्षरस्मृते:'
वाक्य पदीयम्—ब्र०का०कारिका २०

अङ्कितम् —

अङ्क्यते स्म इति अङ्कितम् । अङ्कितशब्दस्य चिन्हार्थे लिखितार्थे वा प्रयोगो वाल्मीकीकीयरामायणस्य सुन्दरकाण्डे समुपलभ्यते । यथा—

राम[1]नामाङ्कितं चेदं पश्य देव्यङ्गुलीयकम्'

अस्मिन्श्लोके रामानामाङ्कितं चेदमित्युक्तम् । रामनाम्ना अङ्कितं चिन्हितम्, लिखितं वेति तदर्थो वेदितव्य: एवं लिप्यर्थे लिखितम्, अक्षरविन्यास:, लिपि:, लिवि: चिन्हम्, अङ्कितम्' इत्येते शब्दा उपलभ्यन्ते । परन्त्वधुना लिपिशब्द एवं अक्षरविन्यासार्थे प्रचुररूपेण बहुत्रप्रयुज्यते ।

'अस्या लिपिकलाया: कथं विकास: सञ्जात:' इत्यस्मिन् विषये बहूनि मतानि दृष्टिपथं समायान्ति आधुनिकानामैतिह्यविदां मतानुसारेण लिपेर्विकासश्चित्रात्सञ्जात: यथा सङ्गीतात्मकस्वरेण भाषणविधेर्यद्वा भाषाया ज्ञानं जातम् एवं चित्रकलातो लेखनकलाया: प्रादुर्भाव: सञ्जात: । चित्रात्मकलिपिप्रणाल्याम् एकेन चित्रेण सम्पूर्णवाक्यस्य बोधो जायते, न तु एक वर्णस्य । शनै शनै रनवधानतादिदोषवशाच्चित्राणां समीचीनरूपेण अङ्कनाभावात् तेषु चित्रेषु विकृति: समायाता गोवत्सादिचित्राणां सुष्ठुरूपेण निर्माणे कर्तव्ये अशक्तया यद्वा त्वरावशाद् अपभ्रष्टचित्राणां निर्माणं प्रारब्धम् । कालक्रमानुसारेण एतेषामपभ्रष्टचित्राणामपि परिवर्तनं जातम् । एतेषां परिवर्तितरूपमेव एकाक्षरध्वन्युद्बोधकं चिन्हमभवत् । चीनजापानमिश्रादिदेशेषु या एकाक्षर बोधकशक्तिमती लिपि: दृश्यते । तस्या मूलं चित्रमेवविद्यते । चीनदेशे च एकाक्षरबोधकलिपेर्विकासकाल: २००० सहस्र वर्षद्वय वर्ष:पूर्वं जातमित्येवम् ऐतिहासिकविद्वांसो मन्यन्ते ।

एवमेव सर्वासां योरोपीयलिपीनामपि परम्परया चित्रादेव विकास: सञ्जात: । यतोहि यूरोपीयलिपीनां मूलं ग्रीकलिपिर्विद्यते[3] । थेराद्वीपे

---

१. वाल्मीकीयरामायणम् सुन्दरकाण्डम् सर्ग: ३६ श्लोक सं० २

२. प्रभुनारायण शर्मकृत भाषाविज्ञानतत्वेति ग्रन्थस्य 'लिपि के विकास का इतिहास' इति स्थले एतदीयोंऽशो द्रष्टव्य: ।

३. इत: पूर्वमुद्धृते ग्रन्थे 'यूरोप की लिपियां' इति स्थले द्रष्टव्यम् ।

ग्रीकलिप्यां समुल्लिखितानां येषां वर्णानां समुपलब्धिर्जाता, तेषां लेखनकालं नवमशती पर्यन्तमैतिह्यविद्भिर्मन्यते । ग्रीकलिपिः सामीत्यपर पर्यायनाम्नाऽप्यभिधीयते । सामीलिपेः स्वरूपम् एकाक्षरात्मकमासीत् । तस्याश्च विकासश्चित्रादेवाभूत् । सामीलिपेः मुमैरीचित्रात्मकसङ्केताद् विकासस्य सत्वाद् 'ग्रीकलिपेश्चित्रादेव विकासः सञ्जातः' इति निश्चयेन वक्तुं युज्यते ।

यूरोपीयलिपीनां चित्रमूलकत्वे द्वितीयं प्रमाणं एतुस्केन नामा लेखो विद्यते । अयं लेखो रोमनदेशस्याभ्युदयात् पूर्वमिटलीभाषायां लिपिवद्धः कृतः । यस्यां लिप्यामयं लेखोविद्यते सा लिपिः एशिया माइनर स्थानाद् रोमदेशं प्राप्ता । एशियामाइनरलिपेर्मूलं चित्रमेवासीत् । कतिपयकालानन्तरम्एशियामाइनरलिपिरेव रोमनलिपिनाम्ना प्रसिद्धिमागता । एवञ्च रोमनलिपेर्मूलभूता एशिया[1]माइनरलिपिः तस्याश्च चित्रमयत्वाद् रोमनलिपेरपि मूलस्वरूपं चित्रमयमेव विद्यते ।

एवं मिश्रचीन एशियामाइनरेत्यादिसमस्त विश्वस्य लिपेर्मूलं सर्वैश्चित्रमेवाङ्गीक्रियते । किन्तु भारतवर्षे अकारादिध्वनेर्लिप्यात्मकस्वरूपस्य कदा कथञ्च विकासः सञ्जातः' इत्यस्मिन् विषये आधुनिकानाम् ऐतिह्यविदां विविधाः प्रवादाः श्रूयन्ते । तद्यथा—

भारते[1] वर्षे अकारादिवर्णानां लिप्यात्मकस्वरूपस्य नितराम् अभावः आसीत् । ऋगादिसर्वेषां वेदानाम् ऋषिसम्प्रदायेषु शिष्यपरम्परया मौखिकरूपेण अध्ययनम् अध्यापनञ्च व्यवहियमाणे आस्ताम् । ऋगादिसंहितास्थमन्त्राणां लिप्यात्मकस्वरूपाभावात्, गुरुमुखादेव श्रवणाद् वेदस्यापरं नाम श्रुतिरिति प्रसिद्धं जातम् । ऋगादिवेदानां प्रादुर्भावानन्तरं प्रचुरसमयेऽतिक्रान्ते सति १८०० अष्टाधिकैक सहस्रम् ई० पूर्वं यदा भारते लेखनकलायाः प्रारम्भः सञ्जातः, तदा वैदिकमन्त्रा लिपिबद्धाः कृताः ।

एवमकारादिवर्णानां भारतीयलिपिविषय विदुषामनेके प्रवादाः श्रूयन्ते । यत्किमपि तैरुच्यते, तत्सर्वमनुमानमात्रं प्रतीयते । वस्तुतस्तु लिपेः स्वरूपमासृष्टेर्विद्यते । यथाऋगादिवेदानां प्राचीनत्वम्, तथा लिपेरपि । आधुनिक विबुधा यं लिपेः प्रारम्भकालं निश्चिन्वन्ति, ततोऽप्यतीव पूर्वं अक्षरविलेखनस्य प्रारम्भः सञ्जातः । अयं विषयः प्रमाणपुरस्सरं क्रमशः प्रतिपाद्यते ।

---

१. इतः पूर्वमुद्धृते ग्रन्थे 'यूरोप की लिपियां' इतिस्थलं द्रष्टव्यम् ।

१. विद्वानों के मतानुसार वैदिकमन्त्र पहिले मौखिक रूप में जीवित थे । श्रुतिनाम उनका एतदर्थ ही पड़ा । उसके बाद १८०० ई. पूर्व भारत में लेखन कला का जन्म होने के कारण वैदिकमन्त्र लिपिबद्ध होने लगे । श्रीवाचस्पति गैरोला 'संस्कृत साहित्य का संक्षिप्त इतिहास' इत्याख्ये ग्रन्थे 'ऋग्वेद का निर्माण' इतिस्थलं द्रष्टव्यम् ।

ऋग्वेदे 'अष्टकर्णि' शब्दस्य प्रयोगः कृतः तत्प्रामाण्येन वैदिक युगे लिपिकलाया अस्तित्वं स्पष्टतया प्रतीयते । तद्यथा--

'इन्द्रेणयुजा निःसृजन्त वाधतोव्रजं गोमन्तमश्विनम् । सहस्रं मे ददतो अष्टकर्ण्यः श्रवो देवेष्वक्रत१ ॥

अस्मिन् मन्त्रे नाभानेदिष्ठाय कृतस्य अष्टकर्णीनां गवां दानस्योल्लेखो दृश्यते । 'अष्टकर्ण्यः' इत्यस्य अष्टौ संख्या कर्णयोर्यासां ताः अष्टकर्ण्यः । न तु अष्टौ कर्णा यासां ताः अष्टकर्ण्यः । ' इति विग्रहः असम्भवात् । एतन्मन्त्रप्रामाण्येन मन्ये यत् पुरा काले बहुषु गोषु मध्ये मदीया का गौः, इयञ्च कस्य गौः, इयं गौर्मदीया वा अन्यस्य' इति भ्रमनिवारणाय गवां कर्णयोरक्षरेष्वङ्केषु च अष्ट संख्याः पञ्चसंख्या वा स्वस्तिकादीनां चिन्हानिवा लिख्यन्ते स्म ।

यद्यप्यष्टकर्णी शब्दार्थविषये विदुषां मतभेदो दृश्यते । तद् यथा सायणाचार्यो व्याप्त्यर्थकाद् अशू धातोः क्त प्रत्ययं विधाय अष्टशब्दं निष्पाद्य व्याप्तकर्णाः (दीर्घकर्णाः) इत्येवं भाष्यं कृतवान् । तन्मतेऽयमष्टकर्णी शब्दः अन्येषामप्यङ्गानामुपलक्षणीभूतः । व्याप्तसर्वावयवाः इत्यर्थे तस्य तात्पर्यम् । यस्या गोः पादविषाणादीनि दीर्घाणि, सा गौः अष्टकर्णी उच्यते । ग्रासमानमहोदयस्तु१ अष्टसंख्यार्थमङ्गीकृत्य अङ्केषु अष्टसंख्यया अङ्कितकर्णा गौरित्यर्थं मन्यते स्म । कश्चिच्च२ छिन्नभिन्नकर्णास्तदर्थमङ्गीकृतवान् । एष्वर्थेषु सायणाचार्यस्वीकृतः 'व्याप्तकर्णाः' अर्थ च अङ्केष्वष्टसंख्यया अङ्कितौ कर्णौ यासां ताः 'अष्टकर्ण्यः' इति ग्रासमान स्वीकृतोऽर्थश्च शब्दशास्त्रदृष्ट्या युक्तः प्रतिभाति । अर्थद्वये निश्चिते सति 'इन्द्रेण युजा' इति ऋग्वेदीये मन्त्रे कोऽर्थो ग्रहीतव्यः इत्यत्र विनिगमनाविरहाद अष्टकर्णीशब्दो वैदिकयुगे लिपेरस्तित्वस्वीकारे प्रमाणतां न आवहति । तथापि मैत्रायणीसंहिताप्रामाण्यबलेन अङ्केषु अष्टसंख्यया चिन्हितस्य कर्णस्यैव ग्रहणं बोद्धव्यम् । अस्यां संहितायां३ 'कर्करिकर्ण्यः, दात्रकर्ण्यः, छिद्रकर्ण्य' इत्येवं गवां विशेषणानि समुपलभ्यन्ते । गवां कर्णयोश्चिन्हाङ्कनप्रथायाः समुपलाभान् मन्ये अष्टकर्णीपदघटकः अष्टशब्दः अङ्केष्वङ्कितस्य संख्या विशेषस्य यद्वा तत्सदृशस्य चिन्हस्य बोधकः । यद्वा भवतु नाम अष्टकर्णीशब्दघटके अष्टशब्दस्य अर्थविषये वैमत्यम् । सायणाचार्यः अष्टशब्दसंख्याया अपि वाचकोऽस्तीति न जानाति स्म इति न । परन्तु मैत्रायणीसंहितायां व्यवहृतानि कर्करिकर्ण्यादिपदानि वैदिकयुगे लेखनकलायाः प्रामाण्यमावहन्ति । वेदस्य ऐतिहासिकदृष्ट्या समीक्षाशीलैर्विद्वद्भिः संहिताकालः प्राचीनतमो गण्यते ।

(क्रमशः)

---

१. ऋग्वेदः मण्डलम् १० सूक्तम् ६२ मन्त्रः ७ ।
२. मूललेखक-ए० ए० मैकडोनेल एम, ए० पी-एच०डी० तथा ए-बी० कीथ एम० ए० डी० सी० एल०बी० अनुवादक रामकुमार राय "वैदिक इण्डेक्स" इतिग्रन्थे एतदीयोंऽशो द्रष्टव्यः ।
३. ४.२.९

कपिलः परमर्षिः

श्री उदयवीर शास्त्री गाजियाबाद

भारतीयपरम्परामैतिह्यं चाश्रित्य कपिलो महर्षिरादिविद्वान् सांख्यशास्त्रं प्रवर्त्तयामासेति ज्ञायते । यद्यपि प्राच्यवाङ्मये कपिलाभिधाना बहवो महर्षयो बभूवुरिति वर्णनमुपलभ्यते, पर सांख्यशास्त्रप्रणेता एक एव कपिल आसीदित्यत्र नास्ति संशयावकाशः । स च विष्णोरंशभूतो नारायणावतारभूतो वा पुराणेषु शास्त्रान्तरेषु च गीयते । स एवायं सांख्यशास्त्रप्रणेता कपिलः कर्दमात् प्रजापतेर्देवहूतिगर्भजातो बाल्यकालादेव ज्ञानसिद्ध आसेति [1]भागवते सुस्पष्टमुपवर्ण्यते ।

श्वेताश्वतरोपनिष[2]त्संदर्भव्याख्यानावसरे शंकराचार्योऽपि विष्णोरंशभूतं 'परमर्षिः' इत्युपनाम्ना प्रसिद्धं सांख्यप्रणेतारं कपिलमंगीकरोति । अन्ये च प्राञ्च आचार्या बौद्धार्हतवैदिकदर्शनमर्मज्ञाः सर्वेऽपि सांख्यप्रणेतृकपिलास्तित्वविषये विचारभेदं नोद्घाटयन्ति । सर्वेषामत्रैकमत्यमेव प्रकाशितं प्रवर्त्तते । एतेन कल्पनाप्रसूत एव कपिलो नास्त्यैतिहासिकः पुरुष इति प्रजल्पन्तः पाश्चात्या निरस्ता एव बोद्धव्याः ।

कपिलोऽयं कस्मिन् देशे काले च जनिं लेभ इति विचारास्पदम् । अन्यथा तस्यैतिहासिकत्वकथनं निराधारमेव स्यात् । तस्य पिता कर्दमो माता च देवहूतिः स्वायम्भुवमनोर्दुहिता आसीत् । तस्याष्टौ भगिन्योऽप्यासन् । तासाञ्च यैः सह समुद्वाहादिकं बभूव, तदप्येतत्सर्वं पुराणेषु वर्णितं वर्त्तते । प्रजापतेः कर्दमस्याश्रमः सरस्वत्युपकण्ठं, ब्रह्मावर्त्तान्तर्गते हिमालयप्रदेशे क्वचिदासीदिति भागवते [1]वायुपुराणे सुस्पष्टमुपदिष्टं वर्त्तते । आश्रमपरिसरसंलग्नान्येव तत्र स्वच्छसलिलपरिपूर्णानि सरांस्यप्यासन्नित्यपि पुराणेषु दृश्यते । कदाचिदयमाश्रमप्रदेशो नाहनमण्डलान्तर्गत 'रेणुका' नाम सरसो नातिदूर उदीच्यां दिश्यासीत् ।

ब्रह्मावर्त्तप्रदेशसम्राट् स्वायंभुवो मनुः स्वदुहितरं देवहूतिं भार्यात्वेन कर्दमाय प्रजापतये प्रदात्, तदाश्रमपदं कदाचिदाजगाम । तदेतदाश्रमपदं ब्रह्मावर्त्तप्रदेशे तत्समीपे वा क्वचिद्भवेदिति भाति । सरस्वतीतीरे खल्वाश्रमस्थितिरिमं विचारं द्रढयति ब्रह्मावर्तस्य प्रत्यक्सीमानमबध्नादियं नदी इति मनूल्लेखादेव सुनिपुणं जानीमः । तथाहि—

सरस्वतीदृषद्वत्योर्देवनद्योर्यदन्तरम् ।
तं देवनिर्मितं देशं ब्रह्मावर्त्तं प्रचक्षते ॥[2]

सरस्वती सरिदियं पुराकालेऽतितरां समादृतापूजिताचबभूव । सेदानीं बहोः कालाल्लुप्तापि भारतीयजनमानसपरिसरे प्रसरत्येव । साम्प्रतमपि कुरुक्षेत्रप्रदेशे तदुत्तरभागे च सुदूरं यावत् प्राक्कालिकसरस्वतीप्रवाहप्रबोधकानि चिन्हानि समुपलभ्यन्ते 'दृषद्वती'' इति गङ्गाया अपरं नाम । तदेतन्महाभारते[3] वैदिकवाङ्मये[4] चानेकत्र समु-

---

१. ३।२१,–२५; ३३–३७ अध्याया द्रष्टव्याः ।
२. श्वे० ५।२॥

१. भाग० ३।२४।६॥ ३।२१।३३ ॥ वा० पु० ३८।६-७॥
२. मनु० २।१७॥
३. म०भा०, शान्ति०, ५७।२८-३०॥ वन०, ८१।६५-६६॥ कुम्भघोण संस्करण ।
४. ताण्डचमहाब्राह्मण,२५।१०।१२-२३॥कात्या० श्रौ० २४।६।६॥ २४।६।३०-३६॥ लाटचा० श्रौ० १०।१६।४॥

पलब्धैः समुल्लेखैः सुप्रमाणितं संजायते । उभयोरनयोर्देवनद्योरन्तरालस्थितप्रदेशस्य 'ब्रह्मावर्त्त' इति नाम तदानीमासीत् ।

नदीप्रवाहस्तदानीं नैतादृश आसीत्, यादृशः साम्प्रतं वरीवर्त्ति । तदानीमेते उभे नद्यौ सरस्वत्याः सहायभूते आस्ताम् । गङ्गापराभिधा दृषद्वती नदी तदा वर्त्तमानं "कनखल" नगरादधोभागे पञ्चदशक्रोशप्रायोमिते शनैः शनैः प्रत्यक्दिक्परिवर्त्तिनी भूत्वा इदानीन्तन सहारनपुरमण्डलान्तर्गत—लण्ढौरा, देवबन्द, गंगोह-प्रभृतिनगरसमीपवर्त्तिनि प्रदेशे प्रवहमाना साम्प्रतं 'पहेवा' इतिनाम्ना प्रसिद्धे 'पृथूदक' नाम्ना प्राचीनवाङ्मयवर्णिते तीर्थस्थाने सरस्वत्या सहसंगच्छते स्म । यमुना तु तत्स्थानात् प्रागेव जगाधरीकुरुक्षेत्रनगरयोरन्तराल एव क्वचित् सरस्वतीं समाविशतिस्म ।

एतयोर्देवनद्योः देवलोकात् प्रारभ्य प्रसृतयोर्मिथः संगमात् प्रागेव यावान् प्रदेशोऽन्तरालभूतः, तस्यैव 'ब्रह्मावर्त्त' इति संज्ञा । एतावतः प्रदेशस्य सम्राट् स्वायम्भुवो मनुः स्वदुहितृदेवहूतिपरिणयहेतोः कर्दमप्रजापतेराश्रमपदं सरस्वतीतीरवर्त्ति कदाचिदाजगाम, यथोक्तं पुरस्तात् — आश्रमपदमिदं नाहन मण्डलान्तर्गत 'रेणुका' सरस उदीच्यां दिशि बिन्दुसरसोनातिदूरआसीत्, इति स्पष्टं भवति । इदानीमपि तत्स्थानं 'कपिल का टिब्बा' इति नाम्ना प्रसिद्धं गीयते । 'टिब्बा' इति पदं समुद्गीर्णं गिरिशिखरमाह । कपिलजन्मप्राधान्यादेवास्य स्थानस्यैतन्नाम प्रसिद्धमभवदिति प्रतीयते । पुराकाले प्रवहन्त्या सरस्वत्याश्चिन्हानि साम्प्रतमप्यस्मिन् प्रदेशे गभीरान्वेषणप्रयाससाध्यानि समुपलब्धुं शक्यन्ते ।

एवं सांख्यशास्त्रप्रणेतुः कपिलस्य जन्मभूः सरस्वत्यास्तीरवर्त्ति कर्दमाश्रमपदं ब्रह्मावर्त्तप्रदेशान्तर्गतं वर्त्तमाने हिमाचलप्रदेश आसीदिति स्पष्टं भवति । बहोः कालात् सरस्वतीप्रवाहो लुप्ततां गतः । तस्यास्तीरे कर्दमाश्रमस्थितिर्नद्याः सलिलपूरप्रवाहकाल एव संभवति । अतः कपिलस्य प्रादुर्भावस्तदानीमेव कल्पयितुं शक्यो यदा सरस्वती वारिपूरेणानवरतं प्रवहति स्म । स च कालो महाभारतयुद्धादप्यतितरां प्राचीन इत्येव वक्तुं शक्नुमः

कपिलप्रणीतं षष्टितन्त्रम्

आधुनिकाः प्रायशः सर्वेऽपि विद्वांसः समुपलभ्यमानेषु सांख्यग्रन्थेषु सांख्यकारिकामीश्वरकृष्णरचितां सांख्यसप्ततिरित्यपराभिधां सर्वापेक्षया प्राचीनां मन्यन्ते । केचन तत्त्वसमाससूत्राणि द्वाविंशतिसंख्यापरिमितान्यपि प्राचीनानीति स्वीकुर्वते । व्यासभाष्ये पातञ्जलयोगदर्शनव्याख्यानभूते तदन्यत्र च समुद्धृताः केचन सन्दर्भाः पञ्चशिखप्रणीतत्वेन वाचस्पतिना वर्णिता इति तेषामपि प्राचीनत्वं दुर्वारमिति त्रय एव सूत्रकारिकानिबद्धाः प्राचीनाः सांख्यग्रन्थाः——

१—तत्त्वसमाससूत्राणि ।

२—पञ्चशिखसूत्राणि ।

३—सांख्यकारिका, चेति ।

अन्योऽप्येको ग्रन्थः षडध्यायात्मकः 'सांख्यदर्शनम्' इति नाम्ना प्रसिद्धः साम्प्रतमुपलभ्यते । भारतीयविद्वज्जनपरम्परायां भारतीयवाङ्मये च सांख्यदर्शनस्यास्य कपिलप्रणीतत्वं स्वीक्रियमाणमपि आधुनिकाः केचन न सहन्ते । प्रवदन्ति च सायणाचार्यकालादपरकाले केनापि विदुषा सांख्यकारिकाः समुपजीव्य सूत्राण्येतानि विरचितानि, कपिलनाम्ना च प्रसिद्धिं गतानि । नैतत्सांख्यदर्शनं कपिलप्रणीतमित्यत्र हेतूंश्चैतान् समुपस्थापयन्ति—

(क) सूत्रेष्वेतेष्वनेकानि सूत्राणि कारिकारूपाणि, सूत्ररचनायां पद्यात्मिका रचना असंगतेव प्रतिभाति । अतः कारिकोपजीव्यत्वं सूत्राणां स्पष्टं भवति ।

(ख) शंकर-सायण - वाचस्पतिमिश्रादिभिः सांख्यसिद्धान्तविवेचनाऽवसरेषु नैतानि सूत्राणि क्वचिदपि समुद्धृतानि । अतो विपरीतं कारिकाः समुद्धृताः समवलोक्यन्ते ।

(ग) सूत्रेषु चैतेषु-न्याय-वैशेषिकादीनां नामोल्लेखः, तदुपज्ञपारिभाषिकपदनिर्देशपूर्वकं तद्विवेचनम्, जैन-बौद्धादिमतप्रत्याख्यानञ्च समुपलभ्यते ।

तदेतत्सर्वं परकालिकमतनामादिनिर्देशनं कपिलेनादिविदुषा पूर्वकालजातेन कथमिव कृतं संभाव्येत ? तस्मादेतानि सूत्राणि 'सांख्यदर्शनम्' इति नाम्ना प्रसिद्धानि षडध्यायात्मकानि न कपिलप्रणीतानि नापि प्राचीनानीत्येव सुवचम् ।

अत्र किञ्चिदुपपादयामः—यद्यपीदं पूर्वोक्तमापाततः समुचितमिव मनोविनोदकरमाभाति, तथापि गभीरदृशा विषयपर्यालोचनं प्रत्यग्दिक्प्रचलितपवनप्रवाहोऽभ्रदलमिव विचारझञ्झावातमिममामूलं सहसा विलोपयति, असारताञ्चास्य विचारस्य प्रत्याययति । तथाहि—

(क) सूत्राणां कारिकाणाञ्च मिथः सन्तुलनेन कारिकासु सर्वासु प्रतिपादितो विषयः सांख्यसूत्राणामध्यायत्रये समाप्यत-इति स्पष्टं ज्ञायते ।

यदि कारिकोपजीव्यानि सूत्राणि, तदाऽवशिष्टस्याध्यायत्रयात्मकस्य सूत्रभागस्य किमुपजीव्यं कल्प्येत ? एवं यथाऽन्तिमभागस्याध्यायत्रयस्य; रचना न कमप्यन्यं ग्रन्थविशेषमुपजीव्यत्वेनापेक्षते, तथादिमस्यापि भागस्याध्यायत्रयात्मकस्य स्वतन्त्रैव रचना कुतो न स्वीक्रियेत ?

तत्राद्येऽध्यायत्रये त्रीणि सूत्राणि कारिकारूपाणि साम्प्रतं मूल सूत्रपाठे मुद्रिते, तद्व्याख्याग्रन्थेषु च केषुचित् समुपलभ्यन्ते । तेषामपि सूत्राणां प्राचीनः पाठः सूत्रात्मक एवासीन्न कारिकात्मक इति सुनिश्चितैः प्रमाणैर्ज्ञायते । तानि त्रीणि सूत्राणि साम्प्रतमेवं पठ्यन्ते—

१. हेतुमदनित्यमव्यापि सक्रियमनेकमाश्रितं लिङ्गम् । (सू०१।१२४; का०१०पूर्वार्द्ध)
२. सात्त्विकमेकादशकं प्रवर्त्तते वैकृतादहंकारात् । (सू. २।१८।।का०२२पूर्वार्द्ध) ।
३. सामान्यकरणवृत्तिः प्राणाद्या वायवः पञ्च । (सू. २।३१।।का०२९उत्तरार्द्ध)

प्रथमांकनिर्दिष्टसूत्रस्य प्राचीने पाठेऽनिरुद्धवृत्तिपठिते 'अव्यापि' इति पदं[1] नासीत् । कारिकाभ्यासपरवशतयाऽध्ययनाध्यापनप्रसंगेन सूत्रेऽपि पदस्यास्य प्रवेशोऽनिरुद्धकालादर्वाक्काले कदाचित् समजायत ।

द्वितीयांकनिर्दिष्टसूत्रस्योभयत्राऽप्ययमेव पाठः । परमाद्ययोः पदयोर्लिङ्गविपर्यासः कारिकायां दृश्यते । तत्रानयोः पदयोः पुल्लिङ्गः पाठः । सूत्रेपुनः

---

१. अनिरुद्धवृत्तौ सूत्रपाठः 'अव्यापि' पदरहितः व्याख्याऽप्यस्य पदस्य तत्र नास्ति । तथा 'सक्रियं इति पदस्थाने 'सक्रियकं' इति पाठः । एतादृशे पाठे कारिकारूपत्वं समूलं नश्यति । (अनि. वृ०, सूत्र (१।१२४) टिप्पणी वृत्ति प्रकाशकः—

J. W. Thamas, Baptist Mission Press, Calcutta, 1888, सम्पादकः Dr. Richard Garbe,

क्रमागतयोरिन्द्रियकरणपदयोरनुवृत्तत्वेन तदनुरोधान्नपुंसकपाठः । कारिकायां तु छन्दोऽनुरोधात् इन्द्रियकरणपदयोरार्यायामसमावेशात् तदुपेक्ष्य कारिकाकृता तत्र 'सर्गः' 'गणः' इति पुल्लिगपदे सन्निवेशिते । तदनुरोधात् आर्यायां 'सात्त्विक एकादशकः' इति पुल्लिगपाठोऽङ्गीकृतः । यदि कारिकाऽनुकारिता सूत्रे कल्प्येत, तदा पुल्लिङ्गपाठेऽपि सूत्रे का बाधा भवेत् ? एतेन सुस्पष्टमार्यासु सूत्रानुकारिताऽनुमीयते, न तु सूत्रेषु कारिकाऽनुकारिता ।

तृतीयांकनिर्दिष्टसूत्रस्यापि प्राचीनोऽच्छन्दोरूपः सूत्रात्मकः पाठः शंकराचार्येण 'न वायुक्रिये पृथगुपदेशात्' (२।४।९) इति ब्रह्मसूत्रव्याख्यानावसरे समुद्धृतः । तत्राद्ययोः पदयोः शांकरभाष्ये असमस्तः 'सामान्या करणवृत्तिः' इत्यात्मकः पाठः, अस्मिन् पाठे कारिकारूपं विलीयते । कारिकाकृता तु पदयोराद्ययोः समासं विधाय सूत्रपाठः कारिकारूपतां नीतः ।

एवं प्रतिवादिभिः समुपस्थापितेषु त्रिषु कारिकारूपेषु सूत्रेषु केवलमेकं सूत्रं द्वितीयांकनिर्दिष्टं कारिकारूपमवशिष्यते । यद्यपि सूत्रार्यापाठयोस्तत्र लिङ्गविपर्यासस्तथापि सूत्रस्य कारिकात्मकताऽवतिष्ठत एव ।

तत्रेदं विचारणीयम्—सूत्राणां कारिकानुकारिता तृतीयाध्यायपर्यन्तमेव वक्तुं शक्या, कारिकाप्रतिपादितस्य समस्तस्य विषयस्य सूत्राणां त्रिष्वध्यायेषु समाप्तेः । यद्यन्तिमेष्वपि त्रिष्वध्यायेषु केषाञ्चित् सूत्राणां छन्दोरूपता स्यात्; तदा किं तस्यापि सूत्रभागस्य छन्दोरूपः कश्चिदुपजीव्यग्रन्थः कल्पनीयः स्यात् ? मन्ये, एवंभूता कल्पना सर्वथाऽप्यसंगता निराधारा एव भवेत् । अन्तिमेष्वप्यध्यायेषुषडध्याय्याः सन्त्येव कानिचित्सूत्राणिच्छन्दोरूपाणि । तथाहि—

(क) तद्विस्मरणेऽपि भेकीवत्' (४।१६), आर्यायास्तुरीयः पादः ।

(ख) 'सक्रियत्वाद्गतिश्रुतेः' (५।७०) अनुष्टुप्छन्दस एकः पादः ।

(ग) 'निजधर्माभिव्यक्तेर्वावैशिष्ट्यात्तदुपलब्धेः' (५।९५), आर्याया द्वितोयोऽर्द्धभागः ।

(घ) 'ध्यानं निर्विषयं मनः' (६।२५), पद्यस्यैकः पादः ।

(ङ) 'पुरुषबहुत्वं व्यवस्थातः' (६।४५), आर्यायाश्चतुर्थः पादः ।

एभिर्निर्देशैर्ज्ञायते, गद्यग्रन्थेष्वपि सूत्रात्मकेषु पद्यगन्धिरचना ग्रन्थकर्त्तुः सूत्रकारस्य रचनाशैलीं तथाविधरचनायां तदिच्छां वा केवलामभिव्यक्तीकरोति । नैतावता प्रस्तुतग्रन्थस्य तन्मूलभूतपद्यात्मकग्रन्थान्वेषणे प्रवृत्तिरपेक्षिता भवति । ग्रन्थान्तरेष्वपि सूत्रात्मकेष्वेवंविधा रचना दृश्यते । पाणिनीयाष्टकेऽपि—

(क) 'पक्षिमत्स्यमृगान् हन्ति, परिपन्थञ्च तिष्ठति' (४।४।३५-३६),

(ख) 'अन्तश्चतवै युगपत्, क्षयोनिवासे, जयः करणम्' (६।१।२००-२०२),

(ग) 'पृषोदरादीनि यथोपदिष्टम्' (६।३।१०९) ।

इत्यादि रचना छन्दोरूपैव । तस्मात् सांख्यषडध्याय्याः कपिलप्रणीतत्वे प्राचीनत्वे च येयं बाधा प्रथमांकिता—सूत्राणां कारिकानुकारितारूपा-समुपस्थापिता, सा सर्वथाऽपि निराधारा असंगता चेति बोध्यम् ।

२ शंकर-वाचस्पति-सायणादिभिराचार्यैर्नोद्धृतानीमानि सूत्राणि स्वग्रन्थेष्विति द्वितीयसंख्याङ्किता बाधा अपि नाधारमालम्बते ।

शंकराचार्येण भगवता ब्रह्मसूत्रभाष्ये (२।४।६) सांख्यसूत्रोद्धारः कृत इति गतपंक्तिषु स्पष्टीकृतम् । अन्यैरपि न केवलं वाचस्पतिसायणप्रभृतिभिराचार्यैः, अपितु सांख्यकारिकाकारादीश्वरकृष्णात् प्राचीनैरप्याचार्यैर्वात्स्यायनपतञ्जलिदेवलप्रभृतिभिः स्वग्रन्थेष्वनेकानि सांख्यसूत्राणि समुद्धृतानि समुपलभ्यन्ते देवलप्रभृतिभिर्धर्मसूत्रकारैः स्वग्रन्थेष्वाश्रित इत्युपपादयन् शंकराचार्योऽपि ब्रह्मसूत्र (१।४।२८) व्याख्यानावसरेऽमुमर्थं स्वीचकार । लेखकलेवरवृद्धिभिया न तान्यत्र संदर्शितानि । जिज्ञासुभिस्तानि 'सांख्यदर्शन का इतिहास' इत्यभिधायामस्मद्रचनायां शक्यन्तेऽवलोकयितुम् । तत्र पंचविंशतितोऽप्यधिकानि सूत्राण्यनेकत्र वाङ्मये समुद्धरणरूपेण प्रसृतानि संकलय्य प्रदर्शितानि सन्ति । उक्तग्रन्थस्य विशेषतस्तुरीयोऽध्यायोऽवलोकनीयः ।

